CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

5DPB

Coll. No. 858

Title Taittirīya nārāyaṇopaniṣat.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 858 Subject: Vedic lit.

Title: Taittirīya nārāyaṇopaniṣad

Author: Scribe:

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9" by 5" Extent: 14 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: —

श्रीगणेशायनमः॥श्रीगुरुचरणकमलेभ्योनमः॥हरिःॐ॥अंभस्यपारेभुव
नस्यमध्येनाकस्यपृष्ठेमहतोमहीयान्॥शुक्रेणज्योतींषिसमनुप्रविष्टःप्रजा
पतिश्चरतिगर्भेअंतः॥यस्मिन्निदंसंचविचैतिसर्वंयस्मिन्देवाअधिविश्वेनिषे
दुः॥तदेवभूतंतदुभव्यमाइदंतदक्षरेपरमेव्योमन्॥येनावृतंखंचदिवंमहींचयेना
दित्यस्तपतितेजसाभ्राजसाच॥यमंतःसमुद्रेकवयोवयंतियदक्षरेपरमेप्रजाः॥
यतःप्रसूताजगतःप्रसूतीतोयेनजीवान्व्यसर्जभूम्यां॥यदोषधीभिःपुरुषा
न्पशूंश्चविवेशभूतानिचराचराणि॥अतःपरंनान्यदणीयसंहिपराचरंयन्मह
तोमहांतं॥यदेकमव्यक्तमनंतरूपंविश्वंपुराणंतमसःपरस्तात्॥१॥तदेवर्तंतदुस व७
त्यमाहुस्तदेवब्रह्मपरमंकवीनां॥इष्टापूर्तंबहुधाजातंजायमानंविश्वंबिभर्तिभुवन
स्यनाभिः॥तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदुचंद्रमाः॥तदेवशुक्रममृतंतद्ब्रह्मतदापःसप्र
जापतिः॥सर्वेनिमेषाजज्ञिरेविद्युतःपुरुषादधि॥कलामुहूर्ताःकाष्ठाश्चाहोरात्राश्चसर्व
शः॥अर्धमासामासाऋतवःसंवत्सरश्चकल्पंतां॥सआपःप्रदुघेउभेइमेअंतरिक्षमथोसुवः॥
नैनमूर्ध्वंनतिर्यंचनमध्येपरिजग्रभत्॥नतस्येशेकश्चनतस्यनामामहद्यशः॥२॥नसं
दृशेतिष्ठतिरूपमस्यनचक्षुषापश्यतिकश्चनैनं॥हृदामनीषामनसाभिक्लृप्तोयएनंवि

दुरमृतास्ते भवंति॥ अद्भ्यः संभूतो हिरण्यगर्भ इत्यष्टौ॥ एष हि देवः प्रदिशोनु स
र्वाः पूर्वो हि जातः स उ गर्भे अंतः॥ स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखास्ति
ष्ठति विश्वतो मुखः॥ विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात्॥
४म सं बाहुभ्यां नमति संपतत्रैर्द्यावापृथिवी जनयन्देव एकः॥ वेनस्तत्पश्यन्विश्वा भुवनानि वि
द्वान्यत्र विश्वं भवत्येकनीडं॥ यस्मिन्निदꣳ सं च वि चैकꣳ स ओतः प्रोतश्च विभुः प्रजासु॥
प्र तद्वोचे अमृतं नु विद्वान्गंधर्वो नाम निहितं गुहासु॥ त्रीणि पदा निहिता गुहासु यस्तद्वे
द सवितुः पिता सत्॥ स नो बंधुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा॥ यत्र देवा
अमृतमानशानास्तृतीये धामान्यभ्यैरयंत॥ परि द्यावापृथिवी यंति सद्यः परिलोकान्परि दि
शः परि सुवः॥ ऋतस्य तंतुं विततं विचृत्य तदपश्यत्तदभवत्प्रजासु॥ परीत्य लोकान्परीत्य
भूतानि परीत्य सर्वाः प्रदिशो दिशश्च॥ प्रजापतिः प्रथमजा ऋतस्यात्मनात्मानमभि सं
४म भूव॥ सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं॥ सनिं मेधामयासिषं उद्दीप्यस्व जातवेदोपघ्न
निःऋतिं मम॥४॥ पशूꣳश्च मह्यमावह जीवनं च दिशो दिश॥ मा नो हिꣳसीज्जातवेदो गा
मश्वं पुरुषं जगत्॥ अबिभ्रदग्न आगहि श्रिया मा परिपातय॥ पुरुषस्य विद्म सहस्राक्ष
स्य महादेवस्य धीमहि॥ तन्नो रुद्रः प्रचोदयात्॥ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि॥

तन्नो दंतिः प्रचोदयात्॥ तत्पुरुषाय विद्महे चक्रतुंडाय धीमहि॥ तन्नो नंदिः प्रचोदया
त्॥ तत्पुरुषाय विद्महे महासेनाय धीमहि॥ तन्नः षण्मुखः प्रचोदयात्॥ तत्पुरुषा
य विद्महे सुवर्णपक्षाय धीमहि॥ तन्नो गरुडः प्रचोदयात्॥ वेदात्मनाय विद्महे हि
रण्यगर्भाय धीमहि॥ तन्नो ब्रह्म प्रचोदयात्॥ नारायणाय विद्महे वासुदेवाय धीमहि॥
तन्नो विष्णुः प्रचोदयात्॥ वज्रनखाय विद्महे तीक्ष्णदꣳष्ट्राय धीमहि॥ तन्नो नारसि
ꣳहः प्रचोदयात्॥ भास्कराय विद्महे महद्द्युतिकराय धीमहि॥ तन्नो आदित्यः प्रचो
दयात्॥ वैश्वानराय विद्महे लालीलाय धीहि॥ तन्नो अग्निः प्रचोदयात्॥ का
त्यायनाय विद्महे कन्यकुमारि धीमहि॥ तन्नो दुर्गिः प्रचोदयात्॥ सहस्रपरमा देवी
शतमूला शतांकुरा॥ सर्वꣳ हरतु मे पापं दूर्वा दुःस्वप्ननाशनी॥ कांडात्कांडात्प्र
४त रोहंती परुषः परुषः परि॥७॥ एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥ या शतेन प्रतनोषि
सहस्रेण विरोहसि॥ तस्यास्ते देवीष्टके विधेम हविषा वयं॥ अश्वक्रांते रथक्रांते विष्णु
क्रांते वसुंधरा॥ शिरसा धारयिष्यामि रक्षस्व मां पदे पदे॥ भूमिर्धेनुर्धरणी लो
कधारिणी॥ उद्धृतासि वराहेण कृष्णेन शतबाहुना॥ मृत्तिके हन मे पापं यन्मया दु

ष्कृतं कृतं।। मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता।। मृत्तिके देहि मे पुष्टिं त्वयि
सर्वं प्रतिष्ठितं।। ८।। मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके।। त्वया हतेन पापेन ग
च्छामि परमां गतिं।। यत इंद्र भयामहे ततो नो अभयं कृधि।। मघवंछग्धि तव तन्न
ऊतये विद्विषो विमृधो जहि।। स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी।। वृषेंद्रः पु
र एतु नः स्वस्तिदा अभयंकरः।। स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।। आपांतमन्युस्तृपलप्रभर्मा
धुनिः शिमीवां छरुमाँ ऋजीषी।। सोमो विश्वान्यतसा वनानि नार्वागिंद्रं प्रतिमानानि
देभुः।।९।। ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः।। स बुध्निया उपमा
अस्य विष्ठाः सतश्च योनिमसतश्च विवः।। स्योना पृथिवि भवानृक्षरा निवेशनी य
च्छा नः शर्म सप्रथाः।। गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं।। ईश्वरीं सर्वभूता
नां तामिहोपह्वये श्रियं।। श्रीर्मे भजतु।। अलक्ष्मीर्मे नश्यतु।। विष्णुमुखा वै देवाश्छंदो
भिरिमाँल्लोकाननपजय्यमभ्यजयन्।। महाँ इंद्रो वज्रबाहुः षोडशी शर्म यच्छतु।।१०।।
स्वस्ति नो मघवा करोतु हंतु पाप्मानं योस्मान्द्वेष्टि।। सोमानं स्वरणं कृणुहि ब्रह्मणस्पते।।

कक्षीवंतं य औशिजं।। शरीरं यज्ञशमलं कुसीदं तस्मिन्सीदतु योस्मान्द्वेष्टि।। ध न
चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि।। तेन पवित्रेण शुद्धेन पूता अ
ति पाप्मानमरातिं तरेम।। सजोषा इंद्र सगणो मरुद्भिः सोमं पिब वृत्रहंछूर विद्वान्।।
हि जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः।। सुमित्रा न आप ओषधयः
संतु दुर्मित्रास्तस्मै भूयासुर्योस्मान्द्वेष्टि यं च वयं द्विष्मः।। आपो हि ष्ठा मयोभुवस्ता
न ऊर्जे दधातन।।११।। महे रणाय चक्षसे।। यो वः शिवतमो रसस्तस्य भाजयतेह नः।। हिर
ण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि याचितः।। यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रति
ग्रहः।। यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं।। तन्न इंद्रो वरुणो बृहस्पतिः सविता
च पुनंतु पुनः पुनः।। नमो अग्नये प्सुमते नम इंद्राय नमो वरुणाय नमो वारुण्यै वा
नमो द्भ्यः।।१२।। यदपां क्रूरं यदमेध्यं यदशांतं तदपगच्छतात्।। अत्याशनादती
पानाद्यच्च उग्रात्प्रतिग्रहात्।। तन्नो वरुणो राजा पाणिना ह्यवमर्शतु।। सोहमपा
पो विरजो निर्मुक्तो मुक्तकिल्बिषः।। नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्मसलोकतां।।
यश्चाप्सु वरुणः स पुनात्वघमर्षणः।। इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमँ
सचता परुष्ण्या।। असिक्निया मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया।।
उशतीरिव मातरः।। तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ।। आपो जनयथा च नः।। ९

ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत॥ ततो रात्रिरजायत ततः समुद्रो अर्णवः॥१॥
समुद्रादर्णवादधिसंवत्सरो अजायत॥ अहोरात्राणि विदधद्विश्वस्य मिषतो वशी॥
सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत॥ दिवं च पृथिवीं चांतरिक्षमथो सुवः॥ यत्
पृथिव्यां रजः स्वमांतरिक्षे विरोदसी॥ इमां स्तदापो वरुणः पुनात्वघमर्षणः॥
पुनंतु वसवः पुनातु वरुणः पुनात्वघमर्षणः॥ एष भूतस्य मध्ये भुवनस्य गोप्ता॥
एष पुण्यकृतां लोकानेष मृत्योर्हिरण्मयं॥ द्यावापृथिव्योर्हिरण्मयं संश्रितं सु
वः॥१४॥ स नः सुवः संशिशाधि॥ आर्द्रं ज्वलति ज्योतिरहमस्मि॥ ज्योतिर्ज्वलति ब्र
ह्माहमस्मि॥ योहमस्मि ब्रह्माहमस्मि॥ अहमस्मि ब्रह्माहमस्मि॥ अहमेवाहं मां जुहो
मि स्वाहा॥ अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः॥ वरुणोपामघमर्ष
णस्तस्मात्पापात्प्रमुच्यते॥ रजो भूमिस्त्वमां रोदयस्व प्रवदंति धीराः॥ आक्रान्त्समु
द्रः प्रथमे विधर्मंजनयन्प्रजा भुवनस्य राजा॥ वृषा पवित्रे अधिसानो अव्ये बृहत्सो
मो वावृधे सुवान इंदुः॥१६॥ परस्माद्यशोगुहासु मम च ऋतुं डायुधीमहि तीक्ष्णदंष्ट्रा राम
य धीमहि परि प्रतिष्ठितं देभु यच्छ तुदधातन्नाद्ध्योणविः सुवीराजेकं च॥१॥ ऋतोरुद्रेश्च ३

श्री२

दंतिश्च नंदिः षण्मुख एव च॥ गरुडो ब्रह्म विष्णुश्च नारसिंहस्तथैव च आदित्यो
ग्निश्च दुर्गिश्च क्रमेण द्वादशाभासि॥ ॥जातवेदसे सुनवाम सोममरातीयतो निदहाति
वेदः॥ स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः॥ तामग्निवर्णां तपसा ज्वलंतीं वै रो
चनीं कर्मफलेषु जुष्टां॥ दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः॥ अग्ने त्वं पारया
नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा॥ पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनया
य शंयोः॥ विश्वानि नो दुर्गहा जातवेदः सिंधुन्न नावा दुरितातिपर्षि॥ अग्ने अत्रिवन्मनसा
गृणानोस्माकं बोध्यविता तनूनां॥ पृतनाजितं सहमानमुग्रमग्निं हुवेम परमा
त्सधस्थात् स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरितात्यग्निः॥ प्रत्नोषि कमीड्यो अ
ध्वरेषु सनाच्च होता नव्यश्च सत्सि॥ स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व॥ गोभि
र्जुष्टमयुजो निषिक्तं तवेंद्र विष्णोरनुसंचरेम॥ नाकस्य पृष्टमभिसंवसानो वैष्णवीं लोक
इह मादयंतां॥१॥२॥ भूरन्नमग्नये पृथिव्यै स्वाहा भुवोन्नं वायवेंतरिक्षाय स्वाहा सुवरन्नमादि र
त्याय दिवे स्वाहा भूर्भुवः सुवरन्नं चंद्रमसे दिग्भ्यः स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भु
वः सुवरन्नमों॥१॥३॥ भूरग्नये पृथिव्यै स्वाहा भुवो वायवेंतरिक्षाय स्वाहा सुवरादित्या
य दिवे स्वाहा भूर्भुवः सुवश्चंद्रमसे दिग्भ्यः स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः

सुवरग्न्योम् ॥२॥४॥ भूरग्नये च पृथिव्यै च महते च स्वाहा भुवो वायवे चांतरिक्षा
य च महते च स्वाहा सुवरादित्याय च दिवे च महते च स्वाहा भूर्भुवः सुवः श्चंद्रम
से च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भु
वः सुवर्महरोम् ॥१॥५॥ पाहि नो अग्न एनसे स्वाहा ॥ पाहि नो विश्ववेदसे स्वाहा ॥ य
भा५ ज्ञं पाहि विभावसो स्वाहा ॥ सर्वं पाहि शतक्रतो स्वाहा ॥१॥६॥ पाहि नो अग्न एकया ॥ पाह्यु
त द्वितीयया ॥ पाह्यूर्जं तृतीयया ॥ पाहि गीर्भिश्चतसृभिर्वसो स्वाहा ॥१॥७॥ यश्छंद
सामृषभो विश्वरूपः छंदोभ्यश्छंदांस्याविवेश ॥ सचाँ शिक्यः पुरो वाचोपनिष
दिंद्रो ज्येष्ठ इंद्रियाय ऋषिभ्यो नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवश्छंद सोम् ॥१॥८॥
नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयोः श्रुतं मा च्योढं ममा
मुष्य ओम् ॥१॥९॥ ऋतं तपः सत्यं तपः श्रुतं तपः शांतं तपो दमस्तपः शमस्तपो दानं तपो
यज्ञं तपो भूर्भुवः सुवर्ब्रह्मैतदुपास्यैतत्तपः ॥१॥१०॥ यथा वृक्षस्य संपुष्पितस्य दूराद्गंधो वा
त्येवं पुण्यस्य कर्मणो दूराद्गंधो वाति यथासिधारां कर्तेऽवहितामवक्रामे यद्युवे युवे
हवा विह्वयिष्यामि कर्तं पतिष्यामीत्येवममृतादात्मानं जुगुप्सेत् ॥१॥११॥ अणोरणीयान्

महतो महीयानात्मा गुहायां निहितोऽस्य जंतोः ॥ तमक्रतुं प[illegible]स्यति वीतशोको धातुः प्र
सादान्महिमानमीशं ॥ सप्त प्राणाः प्रभवंति तस्मात्सप्तार्चिषः समिधः सप्त जिह्वाः ॥ सप्त इमे
लोका येषु चरंति प्राणा गुहाशया न्निहिताः सप्त सप्त ॥ अतः समुद्रा गिरयश्च सर्वेऽस्मात्स्यंद
ते सिंधवः सर्वरूपाः ॥ अतश्च विश्वा ओषधयो रसाश्च येनैष भूतस्तिष्ठत्यंतरात्मा ॥ ब्र
ह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणां ॥ श्येनो गृध्राणां स्वधिति
र्वनानां सोमः पवित्रमत्येति रेभन् ॥ अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयंतीं स्व
रूपां ॥ अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥१२॥ हंसः शुचिषद्वसु
रंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋत
जा अद्रिजा ऋतं बृहत् ॥ घृतं मिमिक्षिरे घृतमस्य योनिर्घृते श्रितो घृतमुवस्य
धाम ॥ अनुष्वधमावह मादयस्व स्वाहा कृतं वृषभ वक्षि हव्यं ॥ समुद्रादूर्मिर्मधुमाँ
उदारदुपांशुना सममृतत्वमानट् ॥ घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाम
मृतस्य नाभिः ॥ वयं नाम प्रब्रवामा घृतेनास्मिन्यज्ञे धारयामा नमोभिः ॥ उ

नै·ना·उ·
॥५॥

पत्रं ह्यास्य एवं घस्यमानं चतुः शृंगो वमीत्गौर एतत्॥ चत्वारि शृंगा त्रयो अस्य
पादा द्वे शीर्षे सप्त हस्तासो अस्य॥ त्रिधा बद्धो वृषभो रोरवीति महो देवो म
र्त्याꣳ आविवेश॥ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविंद
न्॥ इंद्र एकꣳ सूर्य एकं जजान वेनादेकꣳ स्वधया निष्टतक्षुः॥ यो देवानां प्रथमं पु
रस्ताद्विश्वाधियो रुद्रो महर्षिः॥ हिरण्यगर्भं पश्यत जायमानꣳ स नो देवः शु
भयाः स्मृत्याः संयुनक्तु॥ यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायो
स्ति कश्चित्॥ वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वं॥ न कर्मणा न प्र
जया धनेन त्यागेनैके अमृतत्वमानशुः॥ परेण नाकं निहितं गुहायां विभ्राजदेतद्य
तयो विशंति॥ वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाः यतयः शुद्धसत्वाः॥ ते
ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति सर्वे॥ दह्रं विपापं परमेश्मभूतं
यत्पुंडरीकं पुरमध्यसꣳस्थं॥ तत्रापि दह्रं गगनं विशोकस्तस्मिन्यदंतस्तदुपासित
व्यं॥ यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः॥ तस्य प्रकृतिलीनस्य यः परः स महेश्वरः॥
सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवं॥ विश्वं नारायणं देवमक्षरं परमं पदं॥ विश्वतः परमं ॥५॥

नित्यं विश्वं नारायणꣳ हरिं॥ विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति॥ पतिं वि
श्वस्यात्मेश्वरꣳ शाश्वतꣳ शिवमच्युतं॥ नारायणं महाज्ञेयं विश्वात्मानं पराय
णं॥ नारायणपरो ज्योतिरात्मा नारायणः परः॥ नारायणपरं ब्रह्म तत्वं नारायणः
परः॥ नारायणपरो ध्याता ध्यानं नारायणः परः॥ यच्च किंचिज्जगत्सर्वं दृश्यते श्रू
यतेपि वा॥ अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥ अनंतमव्ययं कविꣳ स
मुद्रेंतं विश्वशंभुवं॥ पद्मकोशप्रतीकाशꣳ हृदयं चाप्यधोमुखं॥ अधो निष्ट्या वित
स्त्यांते नाभ्यामुपरि तिष्टति॥ ज्वालमालाकुलं भाती विश्वस्यायतनं महत्॥ संततꣳ शि
लाभिस्तु लंबत्याकोशसन्निभं॥ तस्यांते सुषिरꣳ सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितं॥ तस्य मध्ये
महानग्निर्विश्वार्चिर्विश्वतोमुखः॥ सोग्रभुग्विभजंतिष्ठन्नाहारमजरः कविः॥ तीर्य
गूर्ध्वमधः शायी रश्मयस्तस्य संतता॥ संतापयति स्वं देहमापादतलमस्तकः॥ तस्य मध्ये व
ह्निशिखा अणीयोर्ध्वा व्यवस्थितः॥ नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा॥
नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा॥ तस्याः शिखाया मध्ये परमात्मा व्यवस्थि
तः॥ स ब्रह्मा स शिवः स हरिः स इंद्रः सोक्षरः परमः स्वराट्॥१२॥ आदित्यो वा एष एत

नै·ना·उ·
९

न्मंडलं तपति तत्र ता ऋचस्तदृचां मंडलꣳ स ऋचां लोकोथ य एष एतस्मिन्मंडले
र्चिरीप्यते तानि सामानि स साम्नां लोकोथ य एष एतस्मिन्मंडलेर्चिषि पुरुषस्ता
नि यजूꣳषि स यजुषां मंडलꣳ स यजुषां लोकः सैषा त्रय्येव विद्या तपति य एषो
तरादित्ये हिरण्मयः पुरुषः। आदित्यो वै तेज ओजो बलं यशश्चक्षुः श्रोत्रमात्मा
मनो मन्युर्मनुर्मृत्युः सत्यो मित्रो वायुराकाशः प्राणो लोकपालः कः किं कं तत्स
त्यमन्नममृतो जीवो विश्वः कतमः स्वयंभूर्ब्रह्मैतदमृत एष पुरुष एष भूता
नामधिपतिर्ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोत्येतासामेव देवतानाꣳ सायु
ज्यꣳ सार्ष्टिताꣳ समानलोकतामाप्नोति य एवं वेदेत्युपनिषत्॥ ॥निधनप
तये नमः। निधनपतांतिकाय नमः। ऊर्ध्वाय नमः। ऊर्ध्वलिंगाय नमः। हिरण्या
य नमः। हिरण्यलिंगाय नमः। सुवर्णाय नमः। सुवर्णलिंगाय नमः। दिव्याय न
मः। दिव्यलिंगाय नमः। भवाय नमः। भवलिंगाय नमः। शर्वाय नमः। शर्वलि
गाय नमः। शिवाय नमः। शिवलिंगाय नमः। ज्वलाय नमः। ज्वललिंगाय न राय
मः। आत्माय नमः। आत्मलिंगाय नमः। परमाय नमः। परमलिंगाय नमः। एत ९
त्सोमस्य सूर्यस्य सर्वलिंगꣳ स्थापयति पाणिमंत्रं पवित्रं॥२१॥१७॥ सद्यो

जातं प्रपद्यामि सद्योजाताय वै नमो नमः॥ भवे भवे नातिभवे भवस्व मां॥ भवो
द्भवाय नमः॥१९॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय
नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय न
मः सर्वभूतदमनाय नमो मनोन्मनाय नमः॥२०॥ अघोरेभ्योथ घोरेभ्यो घोरघोरत
रेभ्यः। सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥२०॥ तत्पुरुषाय विद्महे म
हादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्॥२१॥ ईशानः सर्वविद्यानामीश्वरः स
र्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥२२॥
नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेंबिकापतय उ
मापतये पशुपतये नमो नमः॥२३॥ ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः॥२४॥ सर्वो वै रुद्रस्तस्मै रुद्राय नमो
अस्तु। पुरुषो वै रुद्रः सन्महो नमो नमः। विश्वं भूतं भुवनं चित्रं बहुधा जातं जा
यमानं च यत्। सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥२५॥ कद्रुद्राय प्रचेतसे
मीढुष्टमाय तव्यसे। वोचेम शंतमꣳ हृदे। सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु।
॥२६॥ यस्य वैकंकत्यग्निहोत्रहवणी भवति प्रत्येवास्याहुतयस्तिष्ठंत्यथो प्रति

नै॰ना॰उ॰ ह्रिये ॥ नम उग्र पाजसे तिपंच ॥१५७॥ यदि तिदेवा गंधर्वा मनुष्याः पितरोसु
रास्तेषां सर्वभूतानां माता मेदिनी महतां मही सा वित्री गायत्री जगत्युर्वी पृथ्वी ब
॥७॥ हुला विश्वाभूताऽकतमा काया सा सत्येत्यमृतेति वसिष्ठः ॥१५८॥ आपो वा इदं
सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोन्नमापोमृतमापः सम्राडापो वि
राडापः स्वराडापश्छंदांस्यापो ज्योतींष्यापो यजूंष्यापः सत्यमापः सर्वा देवता
आपो भूर्भुवः सुवराप ओम् ॥१५९॥ आपः पुनंतु पृथिवीं पृथिवी पूता पुनातु मां पु
नंतु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु मां ॥ यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम ॥ सर्वं पुन
तु मामापोसतां च प्रतिग्रहं स्वाहा ॥ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृ
तेभ्यः ॥ पापेभ्यो रक्षंतां ॥ यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शि
श्ना ॥ अहस्तदवलुंपतु ॥ यत्किंचदुरितं मयि ॥ इदमहं माममृतयोनौ ॥ सत्ये ज्योतिषि जु
होमि स्वाहा ॥ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः ॥ पापेभ्यो रक्षंतां ॥ यद्रात्रि
नि या पापमकार्षं ॥ मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना ॥ रात्रिस्तदवलुंपतु ॥ य
त्किंचदुरितं मयि ॥ इदमहं माममृतयोनौ ॥ सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ ॐमित्येका
क्षरं ब्रह्म ॥ अग्निर्देवता ब्रह्म इत्यार्षं गायत्रं छंदः परमात्मं सरूपं ॥ सायुज्यं विनियो ॥७॥

गः ॥ आयातु वरदा देवी अक्षरं ब्रह्मसम्मितं ॥ गायत्री छंदसां मातेदं ब्रह्म जुषस्व मे
॥ यदह्नात्कुरुते पापं तदह्नात्प्रतिमुच्यते ॥ यद्रात्रियात्कुरुते पापं तद्रात्रियात्प्रतिमुच्य
ते ॥ सर्ववर्णे महादेवी संध्याविद्ये सरस्वति ॥ ॐ ओजोसि सहोसि बलमसि भ्राजोसि दे
वानां धामनामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरोम् ॥ गायत्रीमावा
हयामि सावित्रीमावाहयामि सरस्वतीमावाहयामि छंदर्षीनावाहयामि श्रियमा
वाहयामि गायत्रिया गायत्री छंदो विश्वामित्र ऋषिः सविता देवता अग्निर्मुखं ब्रह्मा
शिरो विष्णुर्हृदयं रुद्रः शिखा पृथिवी योनिः प्राणापानव्यानोदानसमाना सप्राण
श्वेतवर्णा सांख्यायनसगोत्रा गायत्री चतुर्विंशत्यक्षरा त्रिपदा षट्कुक्षिः पंच
शीर्षोपनयने विनियोगः ॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ
सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥ धियो यो नः प्रचोदयात् ॥ ॐ आपो ज्यो
ती रसोमृतं ब्रह्म भूर्भुवः सुवरोम् ॥ उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि ॥ ब्राह्म
णेभ्योभ्यनुज्ञाता गच्छ देवि यथासुखं ॥ स्तुता मया वरदा वेदमाता प्रचोदयंती प
वने द्विजाता ॥ आयुः पृथिव्यां द्रविणं ब्रह्मवर्चसं मह्यं दत्वा प्रजातुं ब्रह्मलोकं ॥ घृणिः
सूर्य आदित्यो न प्रभा वात्यक्षरं ॥ मधु क्षरंति तद्रसं ॥ सत्यं वै तद्रसमापो ज्योती रसो
मृतं ब्रह्म भूर्भुवः सुवरोम् ॥१६१॥ ब्रह्ममेतु मां ॥ मधुमेतु मां ॥ ब्रह्ममेव मधुमेतु मां ॥

तै॰ना॰उ॰ यास्ते सोम प्रजा वत्सोऽभि सो अहं ॥ दुःष्वप्नहं दुरुःषहं ॥ यास्ते सोम प्राणाꣳस्ताञ्जु
॥८॥ होमि ॥ त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् ॥ ब्रह्महत्यां वा एते घ्नंति ॥ ये ब्राह्म
णास्त्रिसुपर्णं पठंति ॥ ते सोमं प्राप्नुवंत्या सहस्रात्पंक्तिं पुनंति ॐ ॥ १ ॥ ३७ ॥ ब्रह्म
मेधया ॥ मधुमेधया ॥ ब्रह्ममेव मधुमेधया ॥ अद्या नो देव सवितः प्रजावत्सावीः
सौभगं ॥ परा दुःष्वप्नियꣳ सुव ॥ विश्वानि देव सवितर्दुरितानि परासुव ॥ यद्भद्रं तन्म
आसुव ॥ मधु वाता ऋतायते मधुक्षरंति सिंधवः ॥ माध्वीर्नः संत्वोषधीः ॥ मधु न
क्तमुतोषसि मधुमत्पार्थिवꣳ रजः ॥ मधु द्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्म
धुमाꣳ अस्तु सूर्यः ॥ माध्वीर्गावो भवंतु नः ॥ य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्या
त् ॥ भ्रूणहत्यां वा एते घ्नंति ॥ ये ब्राह्मणास्त्रिसुपर्णं पठंति ॥ ते सोमं प्राप्नुवंति ॥ आस
हस्रात्पंक्तिं पुनंति ॥ ॐ ॥ ब्रह्ममेधवा ॥ मधुमेधवा ॥ ब्रह्ममेव मधुमेधवा ॥ ब्रह्मा देवानां
पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणां ॥ श्येनो गृध्राणाꣳ स्वधितिर्वनानाꣳ सोमः
पवित्रमत्येति रेभन् ॥ हꣳसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृ
षद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ ऋचे त्वा ऋचे त्वा समित्स्रवं
ति सरितो न धेनाः ॥ अंतर्हृदा मनसा पूयमानाः ॥ घृतस्य धारा अभिचाकशीमि ॥ हिरण्य ॥८॥

यो वेतसो मध्य आसां ॥ तस्मिन्त्सुपर्णो मधुकृत्कुलायी भजन्नास्ते मधु देवताभ्यः ॥ त
स्यासते हरयः सप्त तीरे स्वधां दुहाना अमृतस्य धारां ॥ य इदं त्रिसुपर्णमयाचितं ब्राह्म
णाय दद्यात् ॥ वीरहत्यां वा एते घ्नंति ॥ ये ब्राह्मणास्त्रिसुपर्णं पठंति ॥ ते सोमं प्राप्नुवंति ॥ आ
सहस्रात्पंक्तिं पुनंति ॥ ॐ ॥ १ ॥ ३८ ॥ मेधा देवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना ॥
त्वया जुष्टा नुदमाना दुरुक्तान् बृहद्वदेम विदथे सुवीराः ॥ त्वया जुष्ट ऋषिर्भवति दे
वि त्वया ब्रह्मागतश्रीरुत त्वया ॥ त्वया जुष्टश्चित्रं विंदते वसु सा नो जुषस्व द्रवि
णेन मेधे ॥ १ ॥ ४२ ॥ मेधां म इंद्रो ददातु मेधां देवी सरस्वती ॥ मेधां मे अश्वि
नावुभावाधत्तां पुष्करस्रजा ॥ अप्सरासु च या मेधा गंधर्वेषु च यन्मनः ॥ दैवीं
मेधा सरस्वती सा मां मेधा सुरभिर्जुषताꣳ स्वाहा ॥ १ ॥ ४३ ॥ आ मां मे
धा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या ॥ ऊर्जस्वती पयसा पि
न्वमाना सा मां मेधा सुप्रतीका जुषंतां ॥ १ ॥ ४४ ॥ मयि मेधां मयि प्रजां मय्य
ग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयींद्र इंद्रियं दधातु मयि मेधां म
यि प्रजां मयि सूर्यो भ्राजो दधातु ॥ १ ॥ ४५ ॥ अपैतु मृत्युरमृतं न आगन्वै
वस्वतो नो अभयं कृणोतु ॥ पर्णं वनस्पतेरिवाभि नः शीयताꣳ रयिः सरस्वती

तै॰ ना॰ उ॰
६

नः शची पतिः ॥१४६॥ परम्मृत्यो अनुपरेहि पंथां यस्ते स्व इतरो देवयानात् ॥ चक्षु
ष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान् ॥१४७॥ वात प्राणं मनसान्वारभा
महे प्रजापतिं यो भुवनस्य गोपाः ॥ स नो मृत्योस्त्रायतां पात्वꣳहसो ज्योग्जीवा जरामशीमहि ॥
१४८॥ अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुंचः ॥ प्रत्यौहतामश्विना मृत्युमस्माद्देवाना
मग्ने भिषजा शचीभिः ॥१४९॥ हरिꣳ हरंतमनुयंति देवा विश्वस्येशानं वृषभं मतीनां ॥ ब्रह्मसरू
पमनु मेदमागादयनं मा विवधीर्विक्रमस्व ॥१५०॥ शल्कैरग्निमिंधान उभौ लोकौ सनेमहं ॥ उभ
योर्लोकयोरृध्वाति मृत्युं तराम्यहं ॥१५१॥ मा छिदो मृत्यो मा विवधीर्मा मे बलं विवृहो मा प्रमो
षीः ॥ प्रजां मा मे रीरिष आयुरुग्र नृचक्षसं त्वा हविषा विधेम ॥१५२॥ मा नो महांतमुत मा नो अ
र्भकं मा न उक्षंतमुत मा न उक्षितं ॥ मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥१५३॥
मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ॥ वीरान्मा नो रुद्र भामितो वधीर्ह
विष्मंतो नमसा विधेम ते ॥१५४॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ॥ यत्का
मास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणां ॥१५५॥ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो
वशी ॥ वृषेंद्रः पुर एतु नः स्वस्तिदा अभयंकरः ॥१५६॥ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं ॥ उ
र्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥१५७॥ ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हंतवे ॥
तान्यज्ञस्य मायया सर्वानवँजामहे (य) ॥१५८॥ मृत्यवे स्वाहा मृत्यवे स्वाहा ॥१५९॥ देवकृतस्यैनसोवय ६

जनमसि स्वाहा ॥ मनुष्यकृतस्यैनसोवयजनमसि स्वाहा ॥ पितृकृतस्यैनसोवयजन
मसि स्वाहा ॥ आत्मकृतस्यैनसोवयजनमसि स्वाहा ॥ अन्यकृतस्यैनसोवयजनमसि स्वा
हा ॥ अस्मत्कृतस्यैनसोवयजनमसि स्वाहा ॥ यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि
स्वाहा ॥ यत्स्वपंतश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा ॥ यत्सुषुप्तश्च जाग्रतश्चै
नश्चकृम तस्यावयजनमसि स्वाहा ॥ यद्विद्वाꣳसश्चाविद्वाꣳसश्चैनश्चकृम तस्यावयजनम
सि स्वाहा ॥ एनस एनसोवयजनमसि स्वाहा ॥१६०॥ यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्र
युती देवहेडनं ॥ अरावा यो नो अभिदुच्छुनायते तस्मिन्तदेनो वसवो निधेतन स्वाहा ॥१६१॥ का
मोकार्षीन्नमो नमः ॥ कामोकार्षीत्कामः करोति नाहं करोमि कामः कर्ता नाहं कर्ता कामः का
रयिता एष ते काम कामाय स्वाहा ॥१६२॥ मन्युरकार्षीन्नमो नमः ॥ मन्युरकार्षीन्मन्युः करोति
नाहं करोमि मन्युः कर्ता नाहं कर्ता मन्युः कारयिता नाहं कारयिता एष ते मन्यो मन्यवे स्वाहा ॥१६३॥
तिलाञ्जुहोमि सरसाꣳ सपिष्टान् गंधार मम चित्ते रमंतु स्वाहा ॥ गावो हिरण्यं धनमन्न
पानꣳ सर्वेषाꣳ श्रियै स्वाहा ॥ श्रियं च लक्ष्मीं च पुष्टिं च कीर्तिं चानृण्यतां ॥ ब्रह्मण्यं बहुपुत्रतां ॥ श्रद्धा
मेधे प्रजाः संददातु स्वाहा ॥१६४॥ तिलाः कृष्णास्तिलाः श्वेतास्तिलाः सौम्या वशानुगाः ॥ तिलाः
पुनंतु मे पापं यत्किंचिद्दुरितं मयि स्वाहा ॥ चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः ॥ गोस्ते
यꣳ सुरापानं भ्रूणहत्या तिला शांतिꣳ शमयंतु स्वाहा ॥ श्रीश्च लक्ष्मीश्च पुष्टिश्च कीर्तिं चा
नृण्यतां ॥ ब्रह्मण्यं बहुपुत्रतां ॥ श्रद्धामेधे प्रज्ञा तु जातवेदः संददातु स्वाहा ॥१६५॥ प्राणा

श्री
तै॰ना॰उ॰
१०

पानव्यानोदानसमाना मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥ वाङ्मनश्च
क्षुश्रोत्रजिह्वाघ्राणरेतोबुध्याकूतिःसंकल्पा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूया
सꣳ स्वाहा॥ त्वक्चर्ममाꣳसरुधिरमेदोमज्जास्नायवोस्थीनि मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा
भूयासꣳ स्वाहा॥ शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघाशिश्नोपस्थपायवो मे शुध्यंतां ज्योतिर
हं विरजा विपाप्मा भूयासꣳ स्वाहा॥ उत्तिष्ठ पुरुष हरित पिंगल लोहिताक्षि देहि देहि ददाप
यिता मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥ पृथिव्यापस्तेजो वायुरा
काशा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥ शब्दस्पर्शरूपरसगंधा मे शुध्यं
तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥ मनोवाक्कायकर्माणि मे शुध्यंतां ज्योतिरहं वि
रजा विपाप्मा भूयासꣳ स्वाहा॥ अव्यक्तभावैरहंकारैर्ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥
१०२ आत्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥ अंतरात्मा मे शुध्यंतां ज्योतिरहं विरजा
विपाप्मा भूयासꣳ स्वाहा॥ परमात्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥ क्षुधे
स्वाहा॥ क्षुत्पिपासाय स्वाहा॥ विविट्यै स्वाहा॥ ऋग्विधानाय स्वाहा॥ कषोत्काय स्वाहा॥ क्षुत्पिपा
सामलं ज्येष्ठामलक्ष्मीं नाशयाम्यहं॥ अभूतिमसमृद्धिं च सर्वां निर्णुद मे पाप्मानꣳ स्वाहा॥ अन्न
मयप्राणमयमनोमयविज्ञानमयमानंदमयमात्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयास
ꣳ स्वाहा॥ अग्नये स्वाहा॥ विश्वेभ्यो देवेभ्यः स्वाहा॥ ध्रुवाय भूमाय स्वाहा॥ ध्रुवक्षितये स्वाहा॥ १०
अच्युतक्षितये स्वाहा॥ अग्नये स्विष्टकृते स्वाहा॥ धर्माय स्वाहा॥ अधर्माय स्वाहा॥ अद्भ्यः स्वाहा॥
श्री

ओषधिवनस्पतिभ्यः स्वाहा॥ रक्षोदेवजनेभ्यः स्वाहा॥ गृह्याभ्यः स्वाहा॥ अवसानेभ्यः स्वाहा॥ अ
वसानपतिभ्य स्वाहा॥ सर्वभूतेभ्यः स्वाहा॥ कामाय स्वाहा॥ अंतरिक्षाय स्वाहा॥ यदेजति जगति यच्च
चेष्टति नाम्नो भागोयं नाम्ने स्वाहा॥ पृथिव्यै स्वाहा॥ अंतरिक्षाय स्वाहा॥ दिवे स्वाहा॥ सूर्याय स्वाहा॥
चंद्रमसे स्वाहा॥ नक्षत्रेभ्यः स्वाहा॥ इंद्राय स्वाहा॥ बृहस्पतये स्वाहा॥ प्रजापतये स्वाहा॥ ब्रह्मणे स्वाहा॥
स्वधा पितृभ्यः स्वाहा॥ नमो रुद्राय पशुपतये स्वाहा॥ देवेभ्यः स्वाहा॥ पितृभ्यः स्वधास्तु॥ भूतेभ्यो नमः॥
मनुष्येभ्यो हंता॥ प्रजापतये स्वाहा॥ परमेष्ठिने स्वाहा॥ यथाकूपः शतधारः सहस्रधारो अक्षितः॥
एवा मे अस्तु धान्यꣳ सहस्रधारमक्षितं॥ धनधान्यै स्वाहा॥ ये भूताः प्रचरंति दिवानक्तं बलिमिच्छं
तो वितुदस्य प्रेष्याः॥ तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्दधातु स्वाहा॥ ॐ तद्ब्रह्म॥
ॐ तद्वायुः॥ ॐ तदात्मा॥ ॐ तत्सत्यं॥ ॐ तत्सर्वं॥ ॐ तत्पुरोर्नमः॥ अंतश्चरति भूतेषु गुहायां
विश्वमूर्तिषु॥ त्वं यज्ञस्त्वं वषट्कारस्त्वमिंद्रस्त्वꣳ रुद्रस्त्वं विष्णुस्त्वं ब्रह्म त्वं प्रजापतिः॥ त्वं तदा
प आपो ज्योती रसोमृतं ब्रह्म भूर्भुवः सुवरों॥ श्रद्धायां प्राणे निविष्टोमृतं जुहोमि॥ श्रद्धायाम
पाने निविष्टोमृतं जुहोमि॥ श्रद्धायां व्याने निविष्टोमृतं जुहोमि॥ श्रद्धायामुदाने निविष्टोमृतं
जुहोमि॥ श्रद्धायाꣳ समाने निविष्टोमृतं जुहोमि॥ ब्रह्मणि म आत्मामृतत्वाय॥ अमृतोपस्त
रणमसि॥ श्रद्धायां प्राणे निविष्टोमृतं जुहोमि॥ शिवो मा विशाप्रदाहाय॥ प्राणाय स्वाहा॥
श्रद्धायामपाने निविष्टोमृतं जुहोमि॥ शिवो मा विशाप्रदाहाय॥ अपानाय स्वाहा॥ श्रद्धा
यां व्याने निविष्टोमृतं जुहोमि॥ शिवो मा विशाप्रदाहाय॥ व्यानाय स्वाहा॥ श्रद्धायामुदाने

नै॰ना॰उ॰ निविष्टोमृतंजुहोमि॥शिवोमाविशाप्रदाहाय॥उदानायस्वाहा॥श्रद्धायांसमानेनिविष्टो
११ मृतंजुहोमि॥शिवोमाविशाप्रदाहाय॥समानायस्वाहा॥ब्रह्मणिमआत्मामृतत्वाय॥
अमृतोपिधानमसि॥२।६९॥श्रद्धायांप्राणेनिविश्यामृतंहुतं॥प्राणमन्नेनाप्याय
स्व॥श्रद्धायामपानेनिविश्यामृतंहुतं॥अपानमन्नेनाप्यायस्व॥श्रद्धायांव्यानेनि
विश्यामृतंहुतं॥व्यानमन्नेनाप्यायस्व॥श्रद्धायामुदानेनिविश्यामृतंहुतं॥उदान
मन्नेनाप्यायस्व॥श्रद्धायांसमानेनिविश्यामृतंहुतं॥समानमन्नेनाप्यायस्व॥१७०॥अं
गुष्ठःमात्रःपुरुषोंगुष्ठंचसमाश्रितः॥ईशःसर्वस्यजगतःप्रभुःप्रीणातिविश्वभुक्॥वाङ्म
आसन्॥नसोःप्राणः॥अक्ष्योश्चक्षुः॥कर्णयोःश्रोत्रं॥बाहुवोर्बलं॥ऊरुवोरोजः॥अ
रिष्टाविश्वान्यंगानितनूः॥तनुवामेसहनमस्तेअस्तुमामाहिंसीः॥१७२॥वयःसुप
र्णाउपसेदुरिंद्रंप्रियमेधाऋषयोनाधमानाः॥अपध्वांतमूर्णुहिपूर्धिचक्षुर्मुमुग्ध्यस्मा
न्निधयेवबद्धान्॥१७३॥प्राणानांग्रंथिरसिरुद्रोमाविशांतकः॥तेनान्नेनाप्यायस्व॥नमोरु
द्रायविष्णवेमृत्युर्मेपाहि॥त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि।त्वंवने राम
भ्यस्त्वमोषधीभ्यस्त्वंनृणांनृपतेजायसेशुचिः॥शिवेनमेसंतिष्ठस्वस्योनेनमेसंतिष्ठस्व ११
सुभूतेनमेसंतिष्ठस्वब्रह्मवर्चसेनमेसंतिष्ठस्वयज्ञस्यर्द्धिमनुसंतिष्ठस्वोपतेयज्ञ ९
नमउपतेनमउपतेनमः॥१७७॥ ॥सत्यंपरंपरंसत्यंसत्येननसुवर्गाल्लोका

च्च्यवंतेकदाचनसतांहिसत्यंतस्मात्सत्येरमंतेतपइतितपोनानशनात्परंयद्धिपरं
तपस्तद्दुर्धर्षंतद्दुराधर्षंतस्मात्तपसिरमंतेदमइतिनियतंब्रह्मचारिणस्तस्माद्दमेरमंतेश
मइत्यरण्येमुनयस्तस्माच्छमेरमंतेदानमितिसर्वाणिभूतानिप्रशंसंतिदानान्नातिदु
ष्करंतस्माद्दानेरमंतेधर्मइतिधर्मेणसर्वमिदंपरिगृहीतंधर्मान्नातिदानान्नातिदुष्कर
तस्माद्धर्मेरमंतेधर्मदुष्करंतस्माद्धर्मेरमंतेप्रजनइतिभूयांसस्तस्माद्भूयिष्ठाःप्रजायंते
तस्माद्भूयिष्ठाःप्रजनेरमंतेअग्नयइत्याहतस्मादग्नयआध्यातव्याअग्निहोत्रमित्याहतस्माद
ग्निहोत्रेरमंतेयज्ञइतियज्ञोहिदेवास्तस्माद्यज्ञेरमंतेमानसमितिविद्वांसस्तस्माद्वि
द्वांसएवमानसेरमंतेन्यासइतिब्रह्माब्रह्माहिपरःपरोहिब्रह्मातानिवाएतान्यव
राणिपरांसिन्यासएवात्यरेचयद्यएवंवेदेत्युपनिषत्॥१७८॥प्राजापत्योहारु
णिःसुपर्णेयःप्रजापतिंपितरमुपससारकिंभगवंतःपरमंवदंतीतितस्मैप्रोवा
चसत्येनवायुरावातिसत्येनादित्योरोचतेदिविसत्यंवाचःप्रतिष्ठासत्येसर्वंप्रतिष्ठि
तंतस्मात्सत्यंपरमंवदंतितपसादेवादेवतामग्रआयंतपसऋषयस्सुवर
न्वविंदंतपसासपत्नान्प्रणुदामारातीस्तपसिसर्वंप्रतिष्ठितंतस्मात्तपःपरमं
वदंतिदमेनदांताःकिल्बिषमवधून्वंतिदमेनब्रह्मचारिणस्सुवरगच्छंदमोभूताना
दुराधर्षंदमेसर्वंप्रतिष्ठितंतस्माद्दमःपरमंवदंतिशमेनशांताःशिवमाचरंतिश
मेननाकंमुनयोन्वविंदंछमोभूतानांदुराधर्षंछमेसर्वंप्रतिष्ठितंतस्माच्छमःपरमं

तै॰ना॰उ॰ वदंति दानं यज्ञानां वरूथं दक्षिणा लोके दातारꣳ सर्वभूतान्युपजीवंति दानेनारा
तीरपानुदंत दानेन द्विषंतो मित्रा भवंति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं व
१२ दंति धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पंति धर्मेण पापम
पनुदंति धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदंति प्रजननं वै प्रतिष्ठा लोके सा
धुः प्रजायास्तंतुं तन्वानः पितॄणामनृणो भवति तदेव तस्या अनृणं तस्मात्प्र
जननं परमं वदंत्यग्नयो वै त्रयी विद्या देवयानः पंथा गार्हपत्य ऋक्पृथिवी रथं
तरमन्वाहार्यपचनं यजुरंतरिक्षं वामदेव्यमाहवनीयः साम सुवर्गो लोको ब
हत्तस्मादग्नीन्परमं वदंत्यग्निहोत्रꣳ सायंप्रातर्गृहाणां निष्कृतिः स्विष्टꣳ सुहु
तं यज्ञक्रतूनां प्रायणꣳ सुवर्गस्य लोकस्य ज्योतिस्तस्मादग्निहोत्रं परमं वदंति
यज्ञ इति यज्ञेन हि देवा दिवं गता यज्ञेनासुरानपानुदंत यज्ञेन द्विषंतो मित्रा भव
ंति यज्ञे सर्वं प्रतिष्ठितं तस्माद्यज्ञं परमं वदंति मानसं वै प्राजापत्यं पवित्रं मा
नसेन मनसा साधु पश्यति मानसा ऋषयः प्रजा असृजंत मानसे सर्वं प्रतिष्ठि
तं तस्मान्मानसं परमं वदंति न्यास इत्याहुर्मनीषिणो ब्रह्माणं ब्रह्मा विश्वः कत
मः स्वयंभुः प्रजापतिः संवत्सर इति संवत्सरोऽसावादित्यो य एष आदित्ये पुरुषः
स परमेष्ठी ब्रह्मात्मा याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति पर्ज १२

न्येनौषधिवनस्पतयः प्रजायंत ओषधिवनस्पतिभिरन्नं भवत्यन्नेन प्राणाः प्रा
णैर्बलं बलेन तपस्तपसा श्रद्धा श्रद्धया मेधा मेधया मनीषा मनीषया मनो मनसा
शांतिः शांत्या चित्तं चित्तेन स्मृतिꣳ स्मृत्या स्मारꣳ स्मारेण विज्ञानं विज्ञानेनात्मानं वे
४ नं दयति तस्मादन्नं ददन्सर्वाण्येतानि ददात्यन्नात्प्राणा भवंति भूतानां प्राणैर्मनो मन
सश्च विज्ञानं विज्ञानादानंदो ब्रह्मयोनिः स वा एष पुरुषः पंचधा पंचात्मा येन सर्व
मिदं प्रोतं पृथिवी चांतरिक्षं च द्यौश्च दिशश्चावांतरदिशाश्च स वै सर्वमिदं जगत्स
भूतꣳ स भव्यं जिज्ञासक्लृप्त ऋतजा रयिष्ठाः श्रद्धा सत्यो महस्वांस्तपसो वरिष्ठा ज्ञा
त्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वांस्तस्मान्न्यासमेषां तपसामतिरि
क्तमाहुर्वसुरण्वो विभूरसि प्राणे त्वमसि संधाता ब्रह्मन्त्वमसि विश्वधृत्तेजोदास्त्वम
स्यग्निरसि वर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चंद्रमस उपयामगृहीतोऽसि ब
ह्मणे त्वा महस ओमित्यात्मानं युंजीतैतद्वै महोपनिषदं देवानां गुह्यं य एवं वेद ब्रह्मणो
महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानमित्युपनिषत् ॥२॥ तस्यैवं विदुषो यज्ञस्या
त्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः
काम आज्यं मन्युः पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षु
रध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीद्यावद्ध्रियते सा दीक्षा यदश्नाति तद्धविर्यत्पिबति तदस्य

तै॰ना॰उ॰ सोमपानं यद्रमते तदुपसदो यत्संचरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो
१२ या व्याहृतिराहुतिर्यदस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्समिधं यत्प्रातर्मध्यंदिनꣳ
सायं च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि
य ऋतवस्ते पशुबंधा ये संबत्सराश्च परिवत्सराश्च ते हर्गणाः सर्ववेदसं वा एतत्सत्रं यन्मरणं
तदवभृथ एतद्वै जरामर्यमग्निहोत्रꣳ सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव म
हिमानं गत्वादित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चंद्र
मसः सायुज्यꣳ सलोकतामाप्नोत्येतौ वै सूर्याचंद्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति
तस्माद्ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानं॥ ॐ॥ सह नाववतु। सह नौ भुन
क्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै॥ ॐ शांतिः शांतिः शांतिः॥
इति नारायणोपनिषत्समाप्तं॥ ॥अंभस्येक पंचाशद्घृतं जातवेदसे चतुर्दश भूरन्नं भूरग्नये
भूरग्नये चैकमेकं पाहि पाहि चत्वारि चत्वारि छंदसां देव नमो ब्रह्मणे ऋतं तपो यथा वृक्षस्यैक
मेकं मेधारणीयाꣳ चतुस्त्रिꣳशत्सहस्रशीर्षꣳ षड्विꣳशति रादित्यो वा एष आदित्यो वै तेज एक
मेकं निधनपतये त्रयोविꣳशतिः सद्योजातं त्रीणि वामदेवायैकमेकमघोरेभ्यस्तत्पुरुषाय
द्वे ईशानो नमो हिरण्यबाहवे एकमृतꣳ सत्यं द्वे सर्वो वै चत्वारि कद्रुद्राय त्रीणि यस्य वैकंकती
द्वे एष पाजो दिति रापो वा एकमेकमापः पुनंतु चत्वार्यग्निश्च सूर्यश्च नव नव या वामित्य काश्च
चत्वार्यायातु पंच ओजासि दश ओतमे चत्वारि घृणिः स्त्रीणि ब्रह्ममेतु मां यास्तो ब्रह्म हंसा दश ब्रह्म १२

तै॰ना॰उ॰ मेधयाद्यान इमं भ्रूणहत्या ब्रध्यवा ब्रह्मा देवानामिंद्वी वीरहत्यामेकान्नविꣳशतिरे
१३ कान्नविꣳशति मेधा देवी मेधा मम इंद्रश्च त्वारि चत्वार्यायां मेधा द्वे मयि मेधामेकमपैतु परं
वातं प्राणं मनुभ्रात्र भूयाद्वविꣳशतिरग्निं मा छिदो मयोमानो महांतं मानस्तोके प्रजापते
त्वत्सिदाश्यं वक्रयेत सहसंद्वे द्वे मयस्य वस्वाहि के देवकृतस्यैकादश य द्वौ देवाः कामोकार्षी
द्वे द्वे तिलान् जुहोमि गावः श्रियं प्रजाः पंच तिलाः छ्छाश्चोरस्य श्रीः प्रज्ञानुजातवेदः सप्त प्राण
वाक्त्वक्छिर उत्तिष्ठ पुरुष पंच पृथिवी शाꣳ मनो वाग व्यक्तात्मांतरात्मा परमात्मा क्षुधे
अन्नमय पंचदश अग्नये स्वाहेकं चत्वारिꣳशदोंतद्ब्रह्म नव श्रद्धायां प्राणे निविष्टोऽमृतं जुहो
मि चतुर्विꣳशतिः अंबोज्ञायां दश अंगुष्ठमात्रः पुरुषो द्वे वाङ्म आत्मा सन्नद्धो वयः सु
पर्णाः प्राणानां ग्रंथिरसि द्वे नमो रुद्राय एकं त्वमग्ने द्युभिर्द्वे शिवेन मे संतिष्ठस्व सत्यं
प्राजापत्यः तस्यैवमेकमेमशीतिः॥ ॥८०॥ ॥८१॥ ॥८२॥ ॥८२॥ ॥८३॥